# श्रीगीतासार गुर्वष्टोत्तरशतनामावलिस्तोत्रम्

shrIgItAsAra gurvaShTottarashatanAmAvalistotram

sanskritdocuments.org

June 13, 2018

# shrIgItAsAra gurvaShTottarashatanAmAvalistotram

# श्रीगीतासार गुर्वष्टोत्तरशतनामावलिस्तोत्रम्

## Sanskrit Document Information

Text title : gurvaShTottarashatanAmAvalistotram gItAsAra

File name : gurvaShTottarashatanAmAvalistotramgItAsAra.itx

Category : aShTottarashatanAma, deities_misc, gurudev, nAmAvalI

Location : doc_deities_misc

Author : R. Krishnaswami

Description/comments : On shrIchandrashekharabhAratI

Latest update : June 8, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 13, 2018

*sanskritdocuments.org*

# श्रीगीतासार गुर्वष्टोत्तरशतनामावलिस्तोत्रम्

श्रीगणेशाय नमः ।
श्रीगुरुभ्यो नमः ।
गीतामध्यगतैरेव ग्रथितेयं पदैः शुभैः ।
आचार्येन्द्रपदाम्भोजे भक्त्या माला समर्प्यते ॥

वक्तुं ब्रह्मविदां श्रेष्ठं मनोवाचामगोचरम् ।
कथमन्याः समर्थाः स्युर्वाचो भागवतीर्विना ॥

प्रशान्तात्मा विगतभीर्योगी विगतकल्मषः ।
योगयुक्तो विशुद्धात्मा यतचित्तेन्द्रियक्रियः ॥ १॥

स्वकर्मनिरतः शान्तो धर्मात्माऽमितविक्रमः ।
मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ॥ २॥

स्थिरबुद्धिरसंमूढो जितात्मा विगतस्पृहः ।
सर्वसङ्कल्पसंन्यासी भक्तः सङ्गविवर्जितः ॥ ३॥

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
एकाकी योगसंसिद्धो योगारूढोऽपरिग्रहः ॥ ४॥

ध्यानयोगपरो मौनी स्वस्थः संशुद्धकिल्बिषः ।
वीतरागभयक्रोधः स्थितधीर्विगतज्वरः ॥ ५॥

सर्वारम्भपरित्यागी कृत्स्नवित् कृत्स्नकर्मकृत् ।
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥ ६॥

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
अनिकेतः स्थिरमतिर्महात्मा दृढनिश्चयः ॥ ७॥

निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ ८॥

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ॥ ९॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
निस्त्रैगुण्यो वशी ज्ञानी समलोष्टाश्मकाञ्चनः ॥ १०॥

तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ ११॥

विद्वानात्मरतिर्मुक्तो नित्यतृप्तो निराश्रयः ।
अन्तस्सुखोऽन्तरारामः सन्तुष्टः सर्ववित् पुमान् ॥ १२॥

सर्वभूतात्मभूतात्मा तत्त्ववित् समदर्शनः ।
गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ॥ १३॥

आत्मतृप्तो गुरुः पूज्यो गरीयान् पुरुषोत्तमः ।
ब्रह्मभूतः प्रसन्नात्मा लोकानुग्रहकाम्यया ॥ १४॥

स्थितप्रज्ञो गुणातीतः चन्द्रशेखरभारती ।
शारदायाश्चरा मूर्तिः शृङ्गशैले विराजते ॥ १५॥

इति श्रीचन्द्रशेखरभारतीशिष्येण श्री आर. कृष्णस्वामिना
रचितं श्रीगीतासार गुर्वष्टोत्तरशतनामावलिस्तोत्रम् ॥

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

*shrIgItAsAra gurvaShTottarashatanAmAvalistotram*

pdf was typeset on June 13, 2018

Please send corrections to *sanskrit@cheerful.com*